एकादशः पाठः

# कोऽसौ यक्षः

**बालस्तावत् क्रीडासक्तः, क्रीडाविधिना पाठितः अंशः बालाय सुष्टु अवबुध्य इति विदुषामभिप्रायः। क्रीडा-विधिः एकः बालमनोवैज्ञानिकः विधिः। तादृशक्रीडारूपः अन्यः विधिः कथाविधिः। कथाविधिना उपदिष्टः अंशः सम्यगवगम्यत इति। अतः उपनिषत्कथा अत्र प्रस्तुता अस्ति। प्रस्तुतोऽयं पाठ्यांशः केनोपनिषदः तृतीयखण्डादुद्धृतः। अत्र शाङ्करभाष्यस्य वाक्यान्यपि प्रस्तुतानि। अनेन पाठ्यांशमाध्यमेन अहङ्कारेण ज्ञाननेत्राणि निलीयन्त इति, गर्वः न करणीय इति, उपासनया प्राप्तज्ञानस्य-अभिवर्धनं करणीयमिति, बोधयितुं प्रयासः कृतः।**

पुरा किल भगवान् जगदरातीनीश्वरसेतुभेत्तृन् असुरान् जेतुम् इन्द्रादिभ्यो देवेभ्यः शक्तिम् अदात्। तया तेऽसुरान् पराजित्य अमहीयन्त। ततो देवाः स्वसामर्थ्यस्वरूपमहिम्ना एव प्राप्तोऽयं विजय इति अभिमेनिरे। अजानतोऽयं भगवान् मिथ्याभिमानापनोदनेनानुगृह्णीयाम् इति अद्भुतेन विस्मापनीयेन यक्षरूपेण देवानां पुरः प्रादुर्बभूव।

तदजानन्तो देवा अग्रणीम् अग्निम् अब्रुवन् हे अग्ने! एतद्विजानीहि कोऽसौ यक्ष इति? तथास्तु इति अग्निः यक्षमुपागच्छत्।

**यक्षः** – कोऽसि

**अग्निः** – अग्निनामाहं प्रसिद्धः जातवेदा।

**यक्षः** – त्वयि किं सामर्थ्यम्?

**अग्निः** – (सगर्वम्) इदं जगत् सर्वं दहेयम् भस्मीकुर्याम्।

**यक्षः** – (तत्पुरतः तृणं निक्षिपन्.....) एतत् तृणं दह। ततोऽग्निः तत्तृणं सबलं दग्धुं प्रायतत परं तृणमपि दग्धुं अशक्तः देवान् प्रति निवृत्तः।

**देवताः** – हे वायो! गत्वा विजानीहि कोऽसौ यक्ष इति?

**वायुः** – तथास्तु।

**यक्षः** – कोऽसि?

**वायुः** – (सगर्वम्) वायुनामाहं प्रसिद्धः मातरिश्वा।

**यक्षः** – वायो, किं सामर्थ्यम्।

**वायुः** – पृथिव्यामिदं सर्वमपि गृह्णीयाम्।

**यक्षः** – (तत्पुरतः तृणं निक्षिपन्) इदम् आददत्स्व (गृहाण)। अथ वायुः स्वजवेन प्रायतत परं नैव शशाक आदातुम्।

**वायुः** – (देवान् प्रति निवृत्य) अशक्नुवं विज्ञातुं कोऽसौ यक्ष इति।

**देवताः** – हे मघवा! गत्वा विजानीहि कोऽसौ यक्ष इति?

**इन्द्रः** – तथास्तु।

इन्द्रस्य यक्षसमीपमुपसर्पणेन यक्षः तिरोभूतः। इन्द्रस्तु कोऽसाविति ज्ञातुकामः ततो न निवृत्तः। यक्षविषयिणी जिज्ञासया ध्यानमग्नस्येन्द्रस्य पुरः विद्यारूपी स्त्रियाः रूपमेकं प्रादुरभूत्।

**इन्द्रः** – किमेतत् अदर्शयित्वा तिरोभूतोऽयं यक्षः?

**विद्या** – यक्षः, तत्तु ब्रह्म एव ।

**विद्या** – ब्रह्मणैव जिता असुराः। यूयं तत्र निमित्तमात्रम्। अस्माकमेवायं विजयोऽस्माकमेवायं महिमेति युष्माकं मिथ्याभिमानम्। मिथ्याप्रत्ययत्वात् सर्वात्मेश्वरमाहात्म्यावमानात्परा मा भवेम इति भिया युष्मदभिमानं निरस्तुं यक्षरूपेण सन्ददर्श। अतो यूयं युष्मदभिमानं पराकृत्य विद्योपासनं कुरुत।

ततो देवा व्यजानन्त ब्रह्मणो हि शक्तिर्यया महीयामह इति, विजानञ्च –

**न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतयः कुतोऽयमग्निः।**
**तमेव भान्तमनुभाति सर्वं तस्य भाषा सर्वमिदं विभाति॥**

## शब्दार्थः

| | | |
|---|---|---|
| जगदरातीनीश्वरसेतुभेत्तृन् | – | संसारारीशमर्यादोल्लङ्घकान् (संसार के शत्रु तथा ईश्वर की मर्यादा भंग करने वाले) |
| अमहीयन्त | – | महिमायुक्ताः (महिमावान् हुए) |
| स्वसामर्थ्यस्वरूपमहिम्ना | – | स्वशक्तिस्वरूपयशसा (स्वकीय शक्ति, स्वरूप और महिमा से) |
| मिथ्याभिमानापनोदनेन | – | असत्याभिमानभङ्गेन (झूठा गर्व को भंग करने से) |
| अनुगृह्णीयाम् | – | अनुगृह्णामि (अनुग्रहीत करूँ) |
| विजानीहि | – | जानातु (जानो) |
| कोऽसौ | – | कः अयं (यह कौन ) |
| कोऽसि | – | कः भवान्(तुम कौन) |
| उपागच्छत् | – | समीपं गतवान् (पास गया) |
| दह | – | दहतु (जला दो) |
| दहेयम् | – | दहामि (जला दूँगा) |
| गृह्णीयाम् | – | गृह्णामि (ग्रहण करूँगा) |
| आददत्स्व | – | गृहाण (ग्रहण करो) |
| जवेन | – | वेगेन (वेग से) |
| शशाक | – | शक्तवान् (कर सका) |
| मघवा | – | इन्द्रः (इन्द्र) |
| तिरोभूतः | – | अदृश्यः जातः (अदृश्य हो गये) |
| ज्ञातुकामः | – | ज्ञातुमिच्छुकः (जानने की इच्छा वाला) |
| जिज्ञासा | – | ज्ञातुमिच्छा (जानने की इच्छा) |
| अभिमानम् | – | गर्वम् (गर्व) |
| पराकृत्य | – | दूरीकृत्य (दूर करके) |

## अभ्यासः

1. **एकपदेन उत्तरत-**

क) भगवान् देवेभ्यः किं दत्तवान्?

ख) भगवान् केन रूपेण देवानां पुरः प्रादुर्बभूव?

ग) यक्षस्य समीपं प्रथमं कः अगच्छत्?

घ) वायुः कः अस्ति?

ङ) केन जिताः असुराः?

च) इन्द्रस्य पुरतः का प्रादुर्बभूव?

2. **एकवाक्येन उत्तरत -**

क) भगवान् देवेभ्यः किं निमित्तं शक्तिम् अदात्?

ख) अग्नेः सामर्थ्यं किम्?

ग) वायोः सामर्थ्यं किम्?

घ) इन्द्रेण विद्यया किं पृष्टम्?

ङ) देवाः किं व्यजानन्त?

3. **त्रिचतुर्भिर्वाक्यैः उत्तरत-**

क) देवाः अग्निं कुत्र किमर्थञ्च प्रेषयन्?

ख) यक्ष-वायु-संवादं वर्णयत्?

ग) इन्द्रं विद्या किमुक्तवती?

घ) न तत्र सूर्यो भाति इति श्लोकस्य सारांशः कः?

ङ) भगवान् यक्षरूपं किमर्थं धृतवान्?

4. **नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत-**

क) जगदरातीन् ..................

ख) तेऽसुरान् ..................

ग) अभिमानापनोदनेन..................

घ) एतद्विजानीहि..................

ङ) यक्षमुपागच्छत् ..................

च) नैव ..................

छ) तिरोभूतोऽयम् ..................

ज) सन्ददर्श..................

झ) व्यजानन्त..................

5. **अधोलिखितानां पदानां धातुं लकारं पुरुषं वचनं च लिखत-**

| | | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| क) | अदात् | --------- | --------- | --------- | --------- |
| ख) | प्रादुर्बभूव | --------- | --------- | --------- | --------- |
| ग) | अब्रुवन् | --------- | --------- | --------- | --------- |
| घ) | उपागच्छत् | --------- | --------- | --------- | --------- |
| ङ) | असि | --------- | --------- | --------- | --------- |
| च) | दह | --------- | --------- | --------- | --------- |
| छ) | गृहाण | --------- | --------- | --------- | --------- |
| ज) | अस्तु | --------- | --------- | --------- | --------- |
| झ) | कुरुत | --------- | --------- | --------- | --------- |

6. **नामोल्लेखपूर्वकं समास-विग्रहं लिखत-**

क) सबलम्

ख) यक्षरूपेण

ग) अशक्तः

घ) ध्यानमग्नः

ङ) विद्योपासनम्

7. **रिक्तस्थानानि पूरयत -**

क) पुरा किल ................जगदरातीन्, जेतुं शक्तिं अदात्।

ख) ततो देवाः अग्रणीम्..............अब्रुवन्।

ग) हे वायो! गत्वा विजानीहि............इति।

घ) इन्द्रस्य यक्षसमीपमुपसर्पणेन यक्षः..............।

ङ) यक्षः तत्तु..................।

च) तस्य भाषा.......................विभाति।

8. **उचितं मेलयत -**

| | (अ) | (ब) |
|---|---|---|
| क) | इन्द्रः | जातवेदा |
| ख) | मातरिश्वा | अग्निः |
| ग) | अग्निः | वायुः |
| घ) | यक्षः | ब्रह्म |
| ङ) | तृणं दग्धुमशक्तः | मघवा |

**9. कोष्ठकस्थ-अव्ययेभ्यः वाक्यानि रचयत।**

(एव, अति, तथा, ततः, अतः हि, अथ)

................................

................................

................................

................................

................................

................................

................................

**10. किम् कारकमिति / का विभक्तिः इति वा विलिखत-**

क) भगवान् शक्तिम् अदात्।

ख) देवाः अग्निम् अब्रुवन्।

ग) देवान् प्रति निवृत्ताः।

घ) हे वायो! विजानीहि।

ङ) त्वयि किं सामर्थ्यम्।

च) स्त्रियाः रूपमेकं प्रादुरभूत्।

**योग्यताविस्तारः -**

- लिट्, लङ् लकाररूपाणि लिखत-

  पठ्, लिख्, गम्, अस्, उप +गम्, यत् , प्र+यत् , ज्ञा, दृश्, भा
- एतादृशाः भिन्न-भिन्नकथाः सङ्ग्रहणन्तु।
- लघुमूल्येन प्रकाशितानाम् उपनिषदां सङ्ग्रहणं कुरुत।